**अनुरथम्** *ind.* Behind the carriage; P. II. 1. 6.

**अनुरथ्या** [ रथ्यामन्वायतं स्थिता ] A foot-path, a by-road, the margin of a street, ( a path along the margin of a road ); प्रकाशीकरणार्थं च निशागमनशङ्कया । दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः Rām. 2. 6. 18; Mb. 3. 15. 20.

**अनुरसित** *a.* Sounding, echoing; उद्ग्रीवैरनुरसितस्य पुष्करस्य M. 1. 21 accompanied in sound.

**अनुरसः, -रसितम्** Echo, reverberation; °गुरु magnified by echo; अनुरसितगुरूणि स्त्यानमम्बूकृतानि U. 2. 21; (this same vesre occurs in). Māl. 9. 6; Mv. 5. 41.

**अनुरसः** [ अनुगतो रसम् ] 1 A secondary feeling (in Rhet.). -2 A secondary flavour; लवण° saltish taste; मधुरानुरसं रूक्षं लवणानुरसं लघु । नार्यास्तु मधुरं स्तन्यं कषायानुरसं हिमम् Suśr.

**अनुरहस** *a.* [ अनुगतम् रहः ] Secret, solitary, private. **-सम्** *adv.* In secret, apart, privately; अनुरहसमनायि नायकेन Śi. 7. 50.

**अनुरात्र** *a.* Following the night. **-त्रम्** *adv.* In the night; every night, night after night.

**अनुराद्ध** *a.* Accomplished, obtained.

**अनुराध** *a.* 1 Causing welfare; also written as अनूराध; इन्द्रं वयमनूराधं हवामहे Av. -2 Born under the asterism अनुराधा P. IV. 3. 34. **-धः** N. of a Buddhist. **-धा** [ अनुगता राधां विशाखाम् ] N. of the 17th of the 27 lunar mansions or asterisms (so called because it follows राधा or विशाखा). It consists of four stars. **-Comp. -ग्रामः, -पुरम्** the ancient capital of Lankā or Ceylon; founded by अनुराध. Also called अनुरोधपुर, described by Rājaśekhara as full of curiosities. It is a large town in the north of Ceylon "with 1600 square granite pillars which supported the floor of an enormous monastery called 'The Great-Brazen Palace' said to have been built in 161 B. C."

**अनुरुद्** 2. P. To weep along with, condole with, sympathize; गुरुशोकामनुरोदितीव माम् Ku. 4. 15; अनुरोदितीव करुणेन पत्रिणाम् Śi. 4. 47.

**अनुरोदनम्** Condolence, sympathy.

**अनुरुध्** 7 U. 1 To obstruct, block up; शिलाभिर्ये मार्गमनुरुन्धन्ति Mb.; to surround, hem in; रुद्रानुचरैर्मखो महान्.. अन्वरुध्यत Bhāg. -2 To bind, fasten. -3 To stick or adhere to, follow closely, observe, practise; अनुरुध्यादघं त्र्यहम् Ms. 5. 63 should observe impurity (be in mourning); पुमांसमनुरुध्य जाता पुमनुजा P. III. 2. 100 Sk. born immediately after a male. -4 To love, be fond of, or devoted to, attach oneself to. समस्थमनुरुध्यन्ते विषमस्थं त्यजन्ति च Rām.; सद्वृत्तिमनुरुध्यन्तां भवन्तः Mv. 2 follow or adopt; स्वधर्ममनुरुन्धन्ते नातिक्रमम् Ki. 11. 78; नानुरोत्स्ये जगल्लक्ष्मीम् Bk. 16. 23 love, like. -5 To conform to, obey, follow, adapt oneself to, act up to; नियतिं लोक इवानुरुध्यते Ki. 2. 12; हन्त तिर्यञ्चोऽपि परिचयमनुरुध्यन्ते U. 3 remember or cherish (act up to it); मद्वचनमनुरुध्यते वा भवान् K. 181, 298; वात्सल्यमनुरुध्यन्ते महात्मनः Mv. 6 feel the force of compassion; तेनापि रावणे मैत्रीमनुरुध्य व्यपेक्ष्यते Mv. 5. 34 following up; यदि गुरुष्वनुरुध्यसे Mv. 3 regard with respect, obey; अनुरुध्यस्व भगवतो वसिष्ठस्यादेशम् U. 4; चन्द्रकेतोर्वचनम् U. 5. -6 To coax, gratify, flatter, soothe; इत्यादिभिः प्रियशतैरनुरुध्य मुग्धाम् U. 3. 26; अभिनवसेवकजनेऽपि एवमनुरुध्यते K. 207 please by carefully attending to &c., show regard for; 248. -7 To urge, press, entreat, request; आगमनाय अनुरुध्यमानः K. 277; तया चाहमनुरुध्यमानस्तां बकुलमालां दत्तवान् Māl. 1; सा च भीमधन्वना बलवदनुरुद्धा Dk. 122 courted, wooed. -8 To assent or agree to, approve; like, comply with; प्रकृतयो न मे व्यसनमनुरुध्यन्ते Dk. 106; यदि भगवाननुरुध्यते Mv. 4 agree with me.

**अनुरुद्ध** *a.* 1 Checked. -2 Opposed. -3 Pacified, soothed.

**अनुरुध्** *a.* [ रुध-क्विप् ] 1 One who obeys, conforms to &c. -2 Obeyed, observed, wanted (अपेक्षित), written as अनूरुध्; आक्षित् पूर्वास्वपरा अनूरुत् Rv. 3. 55. 5.

**अनुरोधः-धनम्** 1 Compliance, gratification, fulfilling one's wishes &c. -2 Conformity, accordance, obedience, regard, consideration; धर्मानुरोधात् K. 160, 180, 192; अत्र नानुरोधं तर्कये Mv. 7 pleasure or gratification; आधारानुरोधात् Mu. 1. 2 out of regard for; कविश्रमानुरोधाद्वा Ve. 1 in consideration of; दत्तोत्सेकः प्रलपति मया याज्ञवल्क्यानुरोधात् Mv. 3. 28, 5. तदनुरोधात्-धेन accordingly, in accordance with it; वेदेद्विपश्चिन्महतोनुरोधात् Pt. 1. 100 after great consideration; humouring; प्राप्तार्थग्रहणं द्रव्यपरीवर्तोनुरोधनम् H. 2. 101; reference (of a rule.) -3 Pressing, urging, coaxing; entreaty, solicitation, request; क इवात्रानुरोधः K. 209; तदनुरोधात् 135; विनानुरोधात्स्वहितेच्छयैव Ś. 20. 81. -4 Bearing of a rule.

**अनुरोधिन्,-धक** *a.* Compliant, complying with, obeying or conforming to, having regard to, caring for; पतिव्रतानां समयानुरोधिनी Rām.

**अनुरुह्** P. To ascend, mount; पञ्च पदानि रुपो अन्वरोहम् Rv. 10. 13. 3.

**अनुरूप** *a.* [ रूपस्य सदृशः योग्यो वा ] 1 Like, resembling, corresponding to; शब्दानुरूपेण पराक्रमेण भवितव्यम् Pt. 1; worthy of; आत्मानुरूपं वरम् Ś. 1; रूपानुरूप K. 192, 203. -2 Suitable or fit, adapted to, according to, with gen. or in comp.; नैतदनुरूपं भवतः K. 146, 158; भव पितुरनुरूपस्त्वं गुणैर्लोककान्तैः V. 5. 21; काममननुरूपमस्या वपुषो वल्कलम् Ś. 1; स्वप्रमाणानुरूपैः सेचनघटैः *ibid.*; सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत Bg. 17. 3; R. 1. 33; Me. 13 **-पम्** 1 Resemblance, likeness, conformity. -2 Suitability, fitness; अपि जनकसुतायास्तच्च तच्चानुरूपम् U. 6. 26. **-पः** The antistrophe, having the same metre as the स्तोत्रिय or strophe; the second of the three verses (तृच) recited together, the other two being स्तोत्रिय and पर्यास; एकस्तोत्रियेष्वहस्सु योऽन्योऽनन्तरः सोऽनुरूपः Āśval.